दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-54 | 1 | दिसम्बर 24, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् पौषमासः कृष्णपक्षः नवमी तिथिः पौष 10 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचले समाप्ता हिमपातस्य प्रतीक्षा परञ्च वृष्टेः आशां अधुना अपि कुर्वन्ति कृषकाः



3 "भारतीयज्योतिषसंस्था नम्"इत्यस्य पञ्चदिवसीयं राष्ट्रियशैक्षिकमेलनं काश्यां सफलतया



4 ।। श्रीरामायणकथा ।। उत्तरकाण्डम्! (ऊनपञ्चाशत्तमः सर्गः) शत्रुघ्नद्वारा लवणवधः।



## भारतस्य दूरसंचार नियामकप्राधिकरणेन-TRAI इत्यनेन स्वस्य व्याप्तिः विस्तारयितुम् उन्नतजालस्थलस्य अनावरणं कृतम्

हिमसंस्कृतवार्ताः। भारतस्य दूरसंचार नियामकप्राधिकरणेन-TRAI इत्यनेन स्वस्य व्याप्तिः विस्तारयितुं, बृहत्तरेण प्रेक्षकेन सह सम्बद्धतां च कर्तुम् उन्नतजालस्थलस्य अनावरणं कृतम्। एषा वेबसाइट् भारते दूरसञ्चार-प्रसारण-विनियमानाम्, नीतिनाम् अधिनियमानां, प्रदत्तानां, प्रवृत्तीनां च विषये व्यापकसूचनाः प्रदाति, या सामान्यजनस्य, हितधारकाणां, शोधकर्तृणां, अन्तर्राष्ट्रीयदर्शकानां च कृते सुलभतया सुलभा भवति। एताः नवीनविशेषताः दूरसंचारप्रसारणक्षेत्रे TRAI इत्यस्य नियामकपरिकल्पनानां पारदर्शितां जनसहभागितां च वर्धयितुं उद्दिश्यन्ते।

## पञ्चम-अष्टम-कक्षायाः वार्षिकपरीक्षायां असफलतां प्राप्तानां छात्राणां परवर्ती-कक्षां प्रति पदोन्नति-नीतिः समाप्ता



**हिमसंस्कृतवार्ताः।** केन्द्रसर्वकारेण पञ्चम-अष्टम-कक्षायाः वार्षिकपरीक्षायां असफलतां प्राप्तानां छात्राणां परवर्ती-कक्षां प्रति पदोन्नति-नीतिः समाप्ता। शिक्षासचिवः संजयकुमारः पत्रकारैः सह उक्तवान् यत् पञ्चम-अष्टमयोः कक्षायोः वार्षिकपरीक्षायां असफलेभ्यः छात्रेभ्यः मासद्वयाभ्यन्तरे अवसरं प्राप्तुम् अवसरः कल्पितः अस्ति। यदि पुनः परीक्षायाः अनन्तरं ते असफलाः भवन्ति तर्हि तेषां पदोन्नतिः अग्रिमवर्गे न भविष्यति। यावत् प्राथमिकशिक्षा न समाप्ता भवति तावत् एतेषां छात्राणां विद्यालयात् निष्कासनं न भविष्यति इति सः अवदत्। सचिवः अवदत् यत् एषः निर्णयः बालकानां शिक्षणपरिणामेषु परिष्कारं कर्तुं कृतः अस्ति।

## सुभाषितम्

नमन्ति फलिनो वृक्षाः
नमन्ति गुणिनो जनाः।
शुष्ककाष्ठश्च मूर्खश्च
न नमन्ति कदाचन॥

हिन्द्यर्थः- जिस प्रकार से फलों से लदी हुई वृक्ष की डाल झुक जाती है उसी प्रकार से गुणीजन सदैव विनम्र होते हैं किन्तु मूर्ख उस सूखी लकड़ी के समान होता है जो कभी नहीं झुकता।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## कार्मिक-पेन्शनराज्यमन्त्री डॉ. जितेन्द्रसिंहः नवदिल्लीनगरे सुशासनप्रथाविषये राष्ट्रियकार्यशालायाः उद्घाटनं कृतवान्



**हिमसंस्कृतवार्ताः नवदेहली।** कार्मिक-पेन्शनराज्यमन्त्री डॉ. जितेन्द्रसिंहः अवदत् यत् विगतदशवर्षेषु अपशिष्टात् धनसृजनस्य नूतना व्यवस्था सर्वकारेण सज्जीकृता अस्ति। नवदिल्लीनगरे सुशासनप्रथाविषये राष्ट्रियकार्यशालायाः उद्घाटनसमये सः एतत् अवदत्। आसनं सङ्गणकम् इत्यादीनां पुरातनवस्तूनाम् पर्यावरणीयप्रभावं विचार्य श्रीसिंहः भौतिकसञ्चिकानां न्यूनीकरणे शासने परिष्कारे च बलं दत्तवान्। सः अवदत् यत् सुशासनप्रथानां व्यापकप्रसारः सुनिश्चितः स्वच्छता-अभियानस्य तृणमूल-स्तरं यावत् विस्तारस्य आवश्यकता वर्तते। डॉ. सिंहः अवदत् यत् अपशिष्टस्य संसाधनरूपेण उपचारस्य अवधारणा गोमयस्य, परित्यक्तप्लास्टिकस्य च सहितं विविधप्रकारस्य अपशिष्टस्य धनसृजनार्थं प्रयत्नानाम् उपरि बलं ददाति। डॉ. सिंहः विद्यालयेषु स्वच्छशौचालयस्य सुनिश्चितीकरणादिविषयाणां महत्त्वं बोधितवान्। प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य नेतृत्वे एषा समस्या निराकृता इति सः अवदत्। सः अवदत् यत् सीएसआई, बायोटेक्नोलोजी, तकनीकीसंस्थाः च समाविष्टानां विविधविभागानाम् संस्थानां च एकीकरणं अग्रे गमने सहायकं भविष्यति।

## उत्तरप्रदेशपुलिसपञ्जाबपुलिसयोः सह सङ्घर्षे त्रयः खालिस्तानी आतङ्कवादिनः मारिताः



हिमसंस्कृतवार्ताः। पीलीभितमण्डले उत्तर-प्रदेशपुलिसपञ्जाबपुलिसयोः सह सङ्घर्षे त्रयः खालिस्तानी आतङ्कवादिनः मारिताः। पञ्जाबस्य गुरदासपुरमण्डले १९ दिसम्बर् दिनाङ्के पुलिसचौक्यां ग्रेनेड्-आक्रमणे एते आतङ्कवादिनः सम्मिलिताः इति विश्वासः अस्ति।
क्षेत्रे खालिस्तानी आतङ्कवादिनः शङ्कितानां क्रियाकलापानाम् सूचनाः प्राप्ताः इति पुलिसदलेन उक्तम्। संयुक्तपुलिसदलेन तान् ग्रहीतुं प्रयत्नः कृतः, परन्तु ते गोलीकाण्डं आरब्धवन्तः, ततः सङ्घर्षः अभवत् । एषः संघर्षः पुरनपुरपुलिसस्थानक्षेत्रे अभवत् । अस्मिन् सङ्घर्षे आतङ्कवादिनः गम्भीररूपेण घातिताः अभवन् । ते चिकित्सायै सीएचसी पुरनपुर-चिकित्सालये प्रेषिता। तत्र मृतः इति घोषितः । आतङ्कवादिनः गुरुविन्दरसिंहः, वीरेन्द्रसिंहः, जसनप्रीतसिंहः च इति परिचयः कृतः अस्ति । एते प्रतिबन्धिताः समूहः खलिस्तान-कमाण्डो-सेनायाः सह सम्बद्धाः आसन् । तेभ्यः द्वे एके भुशुण्डिके, द्वे ग्लोक् पिस्तौलम् अपि प्राप्तौ।

## सर्वोच्चन्यायालयः-राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा (एन्. ई. ई. टी.) स्नातक-पाठ्यक्रमेषु रिक्त-चिकित्सा-आसनानि पूरयितुं निर्देशः



सर्वोच्चन्यायालयेन चिकित्सा परामर्श समितिं भारते चिकित्सानाम् तीव्र-अभावं लक्षयन्, राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा (एन्. ई. ई. टी.) स्नातक-पाठ्यक्रमेषु रिक्त-चिकित्सा-आसनानि पूरयितुं विशेष-परामर्श-प्रक्रियाम् आयोजयितुं निर्देशः दत्तः। न्यायमूर्तिन्योः बी. आर्. गवायि के. वि. विश्वनाथन् इत्येतयोः पीठः इतोऽपि निर्देशं दत्तवान् यत् रिक्तानि एन्, आरआई. स्थानानि अपि सामान्यवर्गस्य आरक्षणरूपेण परिवर्त्यन्ते तानि, राज्यप्रवेशप्राधिकारिणां माध्यमेन च पूरितानि भवेयुः इति।

## दक्षिणाफ्रीकादेशे मार्गदुर्घटनासु नवदशजनानां मृत्युः



दक्षिणाफ्रीकादेशे मार्गदुर्घटनासु नवदशजनानां मृत्युः अभवत्। लिम्पोपो प्रान्ते एन्-वन-इत्येतस्मिन् राजमार्गे सप्तकारयानानां पारस्परिक सङ्घर्षात् विहितायां दुर्घटनायां सपतजनानां मृत्युरजायत। पञ्चजनाश्च व्रणिताः अभवन्। एकस्यां अन्यघटनायां पूर्वीय- केप-प्रान्ते द्वादशजनाः दिवङ्गताः।

# हिमाचले समाप्ता हिमपातस्य प्रतीक्षा परञ्च वृष्टेः आशां अधुना अपि कुर्वन्ति कृषकाः



**हिमसंस्कृतवार्ताः।** हिमाचले हिमपातस्य प्रतीक्षा समाप्ता, परन्तु अद्यापि वर्षा न अभवत् । यद्यपि केषुचित् स्थानेषु विच्छिन्ना वृष्टिः अभवत्, परन्तु मेघाः यथा आवश्यकं तथा न अवर्षन् , परन्तु आकाशे मेघानां कारणात् जनाः अवश्यमेव आशां कुर्वन्ति यत् अनावृष्टिः समाप्ता भविष्यति । मौसमविभागानुसारं राज्ये आगामिषड्दिनानि यावत् तीव्रशीततरङ्गः निरन्तरं भविष्यति। पूर्वानुमानानुसारं २४, २५ दिनाङ्केषु समतलक्षेत्रेषु सघननीहारस्य संसूचना निर्गता अस्ति । सोमवासरे पर्वतेषु हिमपातस्य कारणात् मण्डी, किन्नौर, लाहौल-स्पितिः, चम्बा इत्यादिषु अनेकेषु क्षेत्रेषु तापः शून्यात् अधः प्राप्तः अस्ति। ताबोनगरे न्यूनतमं १०.२ डिग्री तापमानं ज्ञातम्, ऊना-हमीरपुर,-बिलासपुरनगरेषु अपि कोहराकारणात् जीवनं प्रभावितम् अस्ति ।

सोमवासरस्य प्रातःकालादेव रोहताङ्ग-दर्रेण सह उच्चशिखरेषु हिमपातः आरब्धः अस्ति । रोहताङ्ग-नगरे १० से.मी.पर्यन्तं हिमपातः ज्ञातः अस्ति । राजधानी शिमलानगरे अपि हिमपातः अभवत्, यस्मात् कारणात् पञ्जाब-हरियाणा-राजस्थान,-दिल्ली इत्यादिभ्यः अन्येभ्यः राज्येभ्यः आगच्छन्तः पर्यटकाः आनन्दं लभन्ते । क्रिसमस-नववर्ष-उत्सवयोः कृते बहुसंख्यकाः पर्यटकाः कुल्लू-मनाली-नगरं प्राप्तवन्तः। राज्यस्य अनेकस्थानेषु लघुवृष्टिः, हिमपातः च भविष्यति इति IMD इत्यस्य वरिष्ठः वैज्ञानिकः शोभित् कटियारः कथितवान्। २८ दिसम्बर् दिनाङ्के पश्चिमविकारस्य प्रभावात् अनेकेषु स्थानेषु वर्षा, हिमपातः च भविष्यति ।

# भाजपेतिदलम्-निर्वाचनात् प्राक् दिल्ली-सर्वकारं विरुध्य आरोपपत्रं प्रसारितवत्

भारतीयजनतापार्टीतिदलं विधानसभा निर्वाचनात् प्राक् दिल्लीसर्वकारं विरुध्य आरोपपत्रं प्रसारितवत्। भाजपेतिदलस्य वरिष्ठनेता अनुरागठाकुरः दिल्ल्याः भाजपेतिदलप्रमुखः वीरेन्द्रसचदेवाः अन्ये चनेतारः आम आदमी पार्टीति-सर्वकारे दुःशासनस्य जनेभ्यः कृतवचनानाम् अपूर्तेः च आरोपं प्रख्यापयन्तः ते आरोपपत्राणि ख्यापितवन्तः। अत्रावधौ श्रीठाकुरः यमुनानद्याः प्रदूषणं वायुप्रदूषणं राज्ये भ्रष्टाचारं अन्यान् च विषयान् अखिलत् यस्मिन् आपदलस्य संयोजकः अरविन्दकेजरीवालः पूर्वमुख्यमन्त्री च लक्ष्यीकृतः। श्रीकेजरीवालः भाजपेतिदलस्य आरोपान् त्यजन् उक्तवान् यत् भाजपेतिदलस्य समीपे तं विरुध्य विषयाः नैक विद्यन्ते।



# भारतीयमूलस्य अमेरिकीय-उद्यमशीलः श्रीराम कृष्णन् इत्येषः आर्टिफिशल् इन्टेलिजेन्स्, इत्यस्मिन् विषये व्हाइट्हाउस इत्यस्य वरिष्ठ-नीति-परामर्शकत्वेन नियुक्तः

हिमसंस्कृतवार्ताः। अमेरिकादेशस्य नवनिर्वाचितेन राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन भारतीयमूलस्य अमेरिकीय-उद्यमशीलः श्रीराम कृष्णन् इत्येषः आर्टिफिशल् इन्टेलिजेन्स्, इत्यस्मिन् विषये व्हाइट्हाउस इत्यस्य वरिष्ठ-नीति-परामर्शकत्वेन नियुक्तः। ट्रम्पः अवदत् यत्, कृष्णन इत्येषः, संघीयसर्वकारे ए.आई. नीतिम् आकारं प्रदातुं डेविड्-साक्स् इत्यनेन सह कार्यं करिष्यति, योहि व्हाट्हाउस इत्यस्मिन् ए.आई.-क्रिप्टोजारइत्यनयोः प्रभारी नियुक्तः। कृष्णन इत्यस्य नियुक्तिः भारतीय-अमेरिकीय-समुदायेन व्यापकरूपेण प्रशंसिता। नियुक्तिघोषणायाः अनन्तरं कृष्णन् इत्ययं सामाजिक-संचार पटले X इत्यत्र कृतज्ञतां प्रकटितवान्। इति।



# श्रीमद्भगवद्गीतायाः वर्तमान-समये प्रासंगिकता





शोधार्थी - मनीषा संस्कृत-विभागः
ह.के.वि, महेन्द्रगढ़म् (हरि.)

श्रीमद्भगवद्गीता विश्वस्य धार्मिकशास्त्रम् अस्ति, यद्यपि भगवान् श्रीकृष्णः द्वापरयुगे अर्जुनाय गीतायाः ज्ञानं दत्तवान् परन्तु यदि सम्यक्तया पश्यामः चेत् ततः पूर्वम् अपि शास्त्रेषु गीतायाः सन्देशाः दृश्यन्ते। गीतायाः सन्देशेषु सर्वासां समस्यानां समाधानं प्राप्यते। युवकाः स्वजीवनशैल्यां गीतायाः ज्ञानं समविशेयुः एव। जगतः उत्तमं प्रबन्धनं गीतायाम् एव निहितम् अस्ति ।

वर्तमानकाले वयं द्रष्टुं समर्थाः स्मः यत् युवानः अल्पपरिश्रमेण अधिकं परिणामं प्राप्तुम् इच्छन्ति, यस्मात् कारणात् ते अनेकविधसमस्यासु सम्पतन्ति। आधुनिककाले परिवर्तनस्य गतिः अतीव तीव्रम् अस्ति। प्रगतिः तदा एव प्रशंसनीया, यदा सा सकारात्मका भवति। परिवर्तनस्य सार्थकं तार्किकं च प्रतिक्रिया विषयकज्ञानं गीताशिक्षामाध्यमेन दातुं शक्यते। एतेषु परिवर्तनशीलेषु कालेषु पारम्परिकपद्धत्याधारेण शिक्षा पर्याप्ता नास्ति, परन्तु तत्सहकालं जीवनविरोधितत्त्वानां वृद्धिं निवारयितुं नूतनां मूल्याधारितां शिक्षां दत्त्वा समाजं प्रगतिपथि नेतुम् शक्नुमः। गीतायाः शिक्षाप्रददृष्टिकोणात् शिक्षणं प्राप्य आदर्शाः समाजे स्थापनीयाः। गीता अस्माकं अहङ्कारं विनश्य आत्मज्ञानं पूरयति। येन मनुष्यः स्वस्य वास्तविकं स्वरूपं अवगच्छति। यदा एतत् भवति तदा सः व्यक्तिः दृढविश्वासेन प्रगतिपथं याति। वर्तमानकाले मनुष्यस्य सामाजिक-आध्यात्मिके विकासे बृहत्तमः आन्तरिकः द्वन्द्वाः लोभः, अहंकारः, स्वार्थः इत्यादयः सन्ति। एतेभ्यः सर्वेभ्यः मुक्तिं प्राप्तुं गीता एव प्रभवा अस्ति। एतत् कृत्वा मनुष्यः मानसिकं शान्तिं प्राप्नोति।

श्रीमद्भगवद्गीता अनुसारेण ज्ञानं व्यक्तेः अन्तर्निहितं वर्तते। यदि व्यक्तिअज्ञानावरणं अवृणुः तर्हि लौकिकम् अलौकिकं च ज्ञानं प्राप्नोति। आत्मसाक्षात्काराय मनसः एकाग्रता अतीव महत्त्वपूर्णा अस्ति। गीतायाः उपदेशाः मनुष्यस्य उत्तमचिन्तनस्य ध्यानस्य च उपरि बलं दत्त्वा प्रेरयन्ति। सम्प्रति वयं सर्वे गीतायाः आदर्शान् स्वीकृत्य उत्तमं राष्ट्रं निर्मातुं शक्नुमः।

यदि मम जगति सर्वेषु धार्मिकशास्त्रेषु एकं पुस्तकं चिन्वितुं अवसरः स्यात् तर्हि अहं केवलं गीतां चिनोमि यतोहि यदा कदापि अहं भयंकरे संकटे प्राप्नोमि तथा च यदा अहं किमपि विकल्पं न पश्यामि तदा अहं गीतायाः शरणं गच्छामि। गीतायां केचन् एतादृशाः श्लोकाः सन्ति ये प्रतिकूलकाले अपि मां स्मितं कर्तुं प्रेरयन्ति। उदाहरणतः –

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।**

श्रीमद्भगवद्गीतायां द्वितीयाध्यायस्य चतुर्थे श्लोके निष्कमकर्मयोगस्य वर्णनम् अस्ति - भवतः कर्मसु अधिकारः अस्ति, न तु तेषां परिणामेषु। अतः भवतः कर्मफलं मा कामय, न च चिन्तयतु कर्मत्यागस्य विषये।

परमशान्तेः अवस्था एव समत्वम्। अस्याम् अवस्थायां मनुष्यः निजकर्त्तव्यानि न तु निष्क्रियतया अपितु सक्रियतया करोति। मम मत्यां यदा कदा अपि विश्वग्रामस्य संकल्पना साकारं स्वीकरिष्यति तदा तस्य श्रोतं गीता एव भविष्यति।

।।**योगः कर्मसु कौशलम्।।**

## वैदिकप्रार्थना

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः।
स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः शान्तिः शान्तिः॥



# राज्यस्तरीय-सूत्रान्त्याक्षरी-स्पर्धायां क्यार्टू-संस्कृत-महाविद्यालयेन सततं तृतीयवारं प्राप्तं प्रथमं स्थानम्



**हिमसंस्कृतवार्ताः डॉ.सन्तोषकुमारःशिमला।** सिरमौर-जनपदस्य गोरक्षनाथ-राजकीय-संस्कृत-महाविद्यालयः नाहनम् इत्यत्र हिमाचल-संस्कृत-अकादम्या द्विदिवसात्मक-राज्यस्तरीयान्तर्महाविद्यालयीय-संस्कृत-प्रतियोगितानाम् आयोजनं कृतम् । १५ महाविद्यालयानां १०४ प्रतिभागिनस्तत्र विविधासु स्पर्धासु भागमगृह्णन् । राजकीय-संस्कृत-महाविद्यालयः क्यार्टू इत्यस्य प्राचार्याः डॉ.राकेश-कुमार-शर्ममहोदयाः असूचयन् यद् तत्र डॉ.वेदप्रकाशपाण्डेयवर्यस्य डॉ.दिनेशभारद्वाजमहोदयस्य च मार्गनिर्देशने अस्माकं महाविद्यालयस्य छात्रदलमपि भागं गृहीतवत् । सूत्रान्त्याक्षरीस्पर्धार्थम् अक्षयः भुवनेश्वरी च, वेदमन्त्रोच्चारणाय विक्रान्तः, गीतिकास्पर्धायै सुशान्तः, श्लोकोच्चारणस्पर्धार्थं नेहा, भाषणप्रतियोगितायै रीतिका, प्रश्नोत्तरी-स्पर्धार्थं हर्षिता पीयूषश्च, सद्योभाषणाय च अक्षयः महाविद्यालयस्य प्रातिनिध्यमकुर्वन् । सर्वेषामेव प्रस्तुतयः प्रशंसनीयाः आसन् । महाविद्यालयस्य प्रतिनिधिभिः छात्रैः एतासु स्पर्धासु सूत्रान्त्याक्षरी-स्पर्धायां प्रथमं स्थानम्, गीतिकास्पर्धायां द्वितीयं स्थानम्, भाषणस्पर्धायां च सान्त्वनापुरस्कारः चतुर्थं वा स्थानं प्राप्तम् । । महाविद्यालयस्य कृते गौरवमयस्समाचारोऽयं यत् सूत्रान्त्याक्षरी-स्पर्धायां सततं तृतीयवारं क्यार्टू-संस्कृत-महाविद्यालयो विजयी अभवत् । प्राचार्यमहाभागैः उक्तं यत् इदं महाविद्यालय-प्राध्यापकानां प्रतिनिधिभूतच्छात्राणां च कठिनतपसः फलम् । विजयोत्सवोपलक्ष्ये महाविद्यालये हर्षमयं वातावरणमस्ति । सर्वेऽपि छात्राः, प्राध्यापकाः, प्राध्यापिकाः, कर्मचारिणश्च महाविद्यालयस्य विजेतृदलं वर्धापनवचोभिरभिनन्दितवन्तः ।

# "बाजपेयीवर्याणां सुशासनस्य विविधायामः" इति विषये एकदिवसीया सङ्गोष्ठी आयोजिता







**हिमसंस्कृतवार्ताः २३ दिसम्बर आचार्यदीनदयालशुक्लः।** उत्तरप्रदेश-संस्कृतसंस्थानं, लखनऊ, डॉ. दयानन्द-एग्लोवैदिक-इण्टरकालेज इत्यस्य संयुक्ततत्त्वावधाने "भारतरत्न-स्वर्गीयः अटलबिहारीबाजपेयीवर्याणां सुशासनस्य विविधायामाः" इत्यस्मिन् विषये आयोज्यमाणा वैचारिकी सङ्गोष्ठी सुसम्पन्ना। तत्र मुख्यवक्तारौ डॉ. अतुलशुक्लवर्य- डॉ. जितेन्द्रशर्ममहोदयौ समुपस्थितौ। प्राचीनकालात् निरन्तरसमृद्धिं प्राप्नोति। वैदिकपरम्पराया सह लौकिकसाहित्यस्य प्रचारार्थं सम्पूर्णे विश्वे सहस्रशः साहित्यग्रन्थाः प्रकाशिताः। लौकिकसाहित्यस्य प्रथमकविमहर्षिवाल्मीकिना आरब्धा परम्परा भासः, कालिदासः, भारविः, भवभूतिः, माघः, अश्वघोषः इत्यादि महाकविनां विश्वप्रसिद्धग्रन्थैः प्रफुल्लिता, प्रफुल्लिता च। चीनस्य स्वातन्त्र्योत्तरकालेषु अभिनव कालिदासादीनां संस्कृतस्य आयामाः जीवनयापनाय एव दत्तमस्ति। अद्यत्वेऽपि प्रतिवर्षं आधुनिकसन्दर्भं मनसि कृत्वा समकालीनविषयेषु संस्कृतसाहित्ये अपि तादृशानि विविधोदाहरणानि सन्तीति। अस्य एकदिवसीयस्य संगोष्ठ्याः उद्देश्यं समाजस्य समक्षं "जीवनस्य विविधाः आयामाः" इति प्रथितः। कार्यक्रमस्य अध्यक्षः विद्यालयस्य प्राचार्यः डॉ. आनन्दकुमारः अथितीभ्यः अङ्गवस्त्राणि स्मृतिचिह्नानि च प्रदत्तम्। समायोजितायाः सङ्गोष्ठ्याः संयोजकाः संस्कृतभारत्याः चित्रकूटविभागसंयोजकाः श्रीवामदेवसंस्कृतमहाविद्यालयस्य, व्याकरणविभागस्य सहायकविभागाध्यक्षः बाँदातः डॉ. रत्नेशत्रिवेदीवर्यः उ. प्र. संस्कृतसंस्थानं लखनऊ इत्यस्य प्रतिनिधिरूपेण समुपस्थिताः। डॉ. त्रिवेदिवर्याः स्वीये वक्तव्ये बाजपेयीवर्याणां जीवनस्य विविधाः आयामाः इति संस्कृतस्य महद्वृतम् अवदानं च प्रोक्तं तस्य शास्त्रीत्या सरलपद्धत्या चोदाहरितम्। अथ च मुख्यतया अस्यां सङ्गोष्ठ्यां प्रदीपपाण्डेयः, दिनेशकुमारसिंहः, सन्तोषकुमारसिंहः, प्रकाशरावः, रामदेवः, प्रशान्तमिश्रः, अमित बाजपेई, सुखदेवतिवारी, प्रशान्तरावतः, प्रदीपः, रहमानः, श्वेता, अर्चना, स्वातिः, साधना, सुतीक्षा इत्यादयः समस्तप्राध्यापकाः, विद्यालयस्य च कर्मचारिणः सहितं द्विशताधिकाः छात्राः अस्यां सङ्गोष्ठ्यां प्रतिभागं कृतवन्तः। समग्रस्यापि कार्यक्रमस्य सञ्चालनं विद्यालयस्य संस्कृतस्य वरिष्ठाध्यापकेन डॉ. जानकीशरणशुक्लेनाभिहितम्।

# "भारतीयज्योतिषसंस्थानम्" इत्यस्य पञ्चदिवसीयं राष्ट्रियशैक्षिकमेलनं काश्यां सफलतया सुसम्पन्नम्




**हिमसंस्कृतवार्ताः 23 दिसम्बर, आचार्यदीनदयालशुक्लः उत्तरप्रदेशः/वाराणसी।** "भारतीयज्योतिषसंस्थानम्" ट्रस्टद्वारा अद्य बजरंगी गार्डन-लॉन, उदयपुरम्, वाराणसी इत्यस्मिन् स्थाने विगत-पंचदिनेभ्यः प्राचलत "पञ्चदिवसीयस्य राष्ट्रिय- शैक्षिक-महोत्सवस्य" सम्पूर्तिरजायत्। अस्य आयोजनं सम्पूर्णे भारते विदुषां कर्मकाण्डेषु भवति तथा भविष्यति। विभिन्न विद्वांसः समागत्य काशीविश्वनाथमन्दिरस्य दर्शनमकुर्वन्। बनारस- हिन्दू-विश्वविद्यालयः अपि विद्वान् आचार्यभक्तिपुत्ररोहतम्, प्रो. शीतलाप्रसादपाण्डेयः तत्र समागतौ। कार्यक्रमस्यायोजनं सुशुवाहीस्थितं भारतीयज्योतिषसंस्थानं ट्रस्टद्वारा अभवत्। संस्थानम् सर्वदा निःशुल्कं विविधानि ज्योतिषशिबिराणि आयोजयति, येन स्थानीयजनानाम् अपि लाभः भवति।

संस्थानस्य अध्यक्ष धीरज दुबे, अम्बिकेश दुबे, हिमांशु जोशी, पुस्तक सिंह, रामकल्याणशर्मा, पवन मिश्रा, आचार्यदिनेशकुमारः, आचार्य वेदप्रकाश शर्मा शिवा दूबे, सौरभ दूबे, सुनीता सहारन, संगीता सुयाल सहितम् अनेके प्रतिभागिनः भागमवोढन्। अथ च अग्रिमकार्यक्रमस्य घोषणा कृता। एषः "मनसदीपरूपः सनातनधर्मस्य ध्वजः" झारखण्डस्य लातेहरं प्रति किञ्चित्काले यावत् प्रस्थास्यति। महान् प्रख्यात ज्योतिष- कर्मकाण्डनिष्णातः आचार्य सन्तोष मिश्र तस्य संचालनं करिष्यते। एषः कार्यक्रमः वाराणसीयाः वैभवार्थम् अस्ति विषयः अस्तित्वम्। आगामिवर्षस्य कार्यक्रमे सर्वे प्रतिभागिनः उत्साहं प्रकटयन्ति। समग्रमपि कार्यक्रमस्य संयोजनं संस्थानस्य संस्थापकः आचार्य अम्बिकेश दुबे कृतवान्। अस्मिन् एव कार्यक्रमे संस्थानेन प्रकाशितस्तस्य "संस्थानवैभवम्" नाम्नी पत्रिकायाः प्रथमसंस्करणस्य यस्य सम्पादको आचार्यदीनदयालशुक्लः वर्तते, तस्याः विमोचनमपि विद्वद्भिः कृतम्। अयमाचार्य भारतीयज्योतिषसंस्थाने "शिक्षाप्रमुखः" इति दायित्वं निर्वहति। संस्थानद्वारा ऑनलाइनमाध्यमेन संचालितस्य कर्मकाण्ड- ज्योतिषडिप्लोमा पाठ्यक्रमस्य छात्राणां प्रायोगिकी परीक्षा, विगतवर्षस्य छात्राणां उपाधिदानं तथा दीक्षान्तकार्यक्रमोरप्यभवत्। सर्वेभ्यः कार्यक्रमस्य प्रमाणपत्राण्यपि वितरितानि।

## सामान्यज्ञानप्रश्नोत्तरी

**हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

प्रश्नः 1. भारते पाटल नगरम् ( **गुलाबी शहर**) कुत्र अस्ति?
उत्तरम् : जयपुर (राजस्थानप्रान्ते)
प्रश्नः 2. 'बालचरितम्' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'भासः'।
प्रश्नः 3. रोगात् मुक्तः इत्यस्य समस्त पदं किम्?
उत्तरम्- रोगमुक्तः (पञ्चमी तत्पुरुषः)
प्रश्नः 4. इति + आदि सन्धिम् कुरुत-
उत्तरम्- इत्यादि।
प्रश्नः 5. 'चाणक्य कस्य प्रधानमन्त्री आसीत्?
उत्तरम्- चन्द्रगुप्तमौर्यस्य।

# ।। श्रीरामायणकथा ।।

## उत्तरकाण्डम्!

### (ऊनपञ्चाशत्तमः सर्गः)

### शत्रुघ्नद्वारा लवणवधः।



एवं कथां कथयतां तेषाम् ऋषीणां शत्रुघ्नस्य च सा रजनी शीघ्रं हि व्यतीता अभवत्। ततः प्रभाते तस्मिन् विमले काले सः वीरः राक्षसः आहारार्थं पुरात् निर्गतः अभवत्। एतस्मिन्नन्तरे धनुष्पाणिः वीरः शत्रुघ्नः यमुनानदीम् उत्तीर्य मधुपुरं गत्वा तस्य पुरस्य मुख्यद्वारे अतिष्ठत्। ततः अर्द्धदिवसे प्राप्ते सः क्रूरकर्मा राक्षसः बहूनां प्राणिनां साहस्रं भारम् उद्वहन् आगच्छत्। ततः सः राक्षसः द्वारे स्थितं धृतायुधं शत्रुघ्नम् अपश्यत्। ततः सः राक्षसः शत्रुघ्नम् अब्रवीत्- एनेन त्वं किं करिष्यसि? रे नराधम! सायुधानाम् ईदृशानां सहस्राणि मया रोषात् भक्षितानि। त्वं कालेन हि अनुगतोऽसि। रे पुरुषाधम! त्वं स्वयमेव अद्य मम मुखं प्रविष्टः अभूः। एतेन मम आहारश्चापि सम्पूर्णः भविष्यति। एवं मुहुर्मुहुः हसतः तस्य भाषितं श्रुत्वा कोपेन शत्रुघ्नस्य नेत्राभ्याम् अश्रूणि प्रवहन्ति स्म।

तस्य रोषाभिभूतस्य महात्मनः शत्रुघ्नस्य सर्वशरीरात् तेजोमयाः मरीच्यः निस्सरन्ति स्म। सुसङ्क्रुद्धः सः शत्रुघ्नः तदा तं निशाचरम् अब्रवीत् रे दुर्बुद्धे! त्वया सह अहं योद्धुमिच्छामि, द्वन्द्वयुद्धम्। अहं राज्ञः दशरथस्य पुत्रः, धीमतः रामस्य भ्राता, मम नाम शत्रुघ्नः तव वधाकाङ्क्षी तव समक्षम् आगतोऽस्मि, अतः मह्यं द्वन्द्वयुद्धं प्रदीयताम्। त्वं सर्वभूतानां शत्रुः अतस्त्वम् इतः जीवन् न गमिष्यसि। तस्मिन् शत्रुघ्ने तथा ब्रुवाणे प्रहसन् सः राक्षसः नरश्रेष्ठं शत्रुघ्नमब्रवीत् रे दुर्मते! दिष्ट्या त्वं प्राप्तोऽसि।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

रावणो नाम राक्षसः मम मातुलः स्त्रीहेतोः रामेण हतः। रावणस्य कुलक्षयं दृष्ट्वापि मया तत् सर्वं क्षान्तम्, परतः अवज्ञां कृत्वा विशेषतः यूयम्।
मया बहवः प्राणिनः मनुष्याश्च हताः, हन्यन्ते च। अपिच यूयं पुरुषाधमाः च मया हनिष्यध्वे। रे दुर्मते! युद्धाकाङ्क्षिणे तुभ्यं युद्धं प्रदास्यामि, मुहूर्तं तिष्ठ यावत् आयुधम् आनयामि। ततः शत्रुघ्नः तमाशु अब्रवीत् - क्व त्वं जीवन् गमिष्यसि? कृतात्मना स्वयमेवागतः शत्रुः न मोक्तव्यः। यः मन्दबुद्धिः विक्लवया बुद्ध्या शत्रवे अवसरं ददाति सः कापुरुषः इव युद्धे हतः भवति। तस्मात् त्वं जीवलोकमिमं सुदृष्टं कुरु। त्वामहं विविधैः शितैः शरैः यमलोकं नयामि यतः त्वं त्रिलोकस्य राघवस्य च रिपुः।

# धारावाहिकं गीताप्रश्नोत्तरम् -१३

**अर्जुनः** - भगवन् ! इतः पूर्वं त्वया यत् त्रिविधत्यागस्य विषये उक्तं, तस्य स्वरूपं किम् ?
**श्रीकृष्णः** - हे भारत ! नियतकर्मणां त्यागः नोचितः कस्यचित् कृते अपि । यदि मोहवशतः केनापि तानि नियतकर्माणि त्यज्यन्ते, तर्हि तादृशः त्यागः तामसत्यागः उच्यते ।
**अर्जुनः** - भगवन् ! राजसत्यागः चेत् कीदृग् भवति ?
**श्रीकृष्णः** - कर्तव्यकर्मणः सम्पादने दुःखमेव इति मत्वा यदि कश्चन शारीरिकक्लेशभयात् कर्मकरणम् एव त्यजति तर्हि तादृशः त्यागः राजसत्यागः उच्यते ।
**अर्जुनः** - सात्त्विकत्यागः चेत् कथं स्यात् केशव ?



**श्रीकृष्णः** - हे पार्थ ! यत् नियतं कर्म, तस्य सम्पादनं मनुष्यस्य कृते परमा आवश्यकता अस्तीति अभिज्ञाय कर्मणाम् आसक्तिं, फलेच्छां च त्यक्त्वा नियतकर्म तु कर्तव्यमेव इत्येतादृशः मनसः दृढनिश्चयः, सात्त्विकः त्यागः उच्यते ।
**अर्जुनः** - त्यागं कर्तुम् इच्छुकः मनुष्यः कीदृग् भवति भगवन्?
**श्रीकृष्णः** - अर्जुन । तादृशः त्यागकर्ता मनुष्यः सकामयुक्तानि निषिद्धकर्माणि तु त्यजति, परन्तु नैव द्वेषपूर्वकम्, तथैव शास्त्रविहितानि कर्माणि तु करोति, परन्तु नैव रागपूर्वकम् इत्येतादृशः मतिमान् त्यागी मनुष्यः निस्सन्देहम् आत्मस्वरूपे तिष्ठति ।
**अर्जुनः** - केशव ! एवं कुतो वा मनुष्येण रागपूर्वकं, द्वेषपूर्वकञ्च वृथा कर्मरूपः परिश्रमः करणीयः ? कर्मणां सर्वथा त्यागः एव क्रियेत चेत् किं स्यात् ?
**श्रीकृष्णः** - नहि पार्थ ! एवं न शक्यते कदाचिदपि । देहधारी मनुष्यः कर्माणि सर्वथा त्यक्तुं न शक्नुयात् । परन्तु यः सर्वथा कर्मफलं त्यक्तुं शक्नुयात्, सः हि त्यागी कथ्यते ।
**अर्जुनः** - कर्मफलम् इत्युक्ते तत् कतिविधं भवति भगवन् ?
**श्रीकृष्णः** - भारत ! कर्मफलमपि त्रिविधमेव भवति । अनुकूलं, प्रतिकूलं, मिश्रितं चेति त्रिविधं फलं भवति, अर्थात् इष्टम्, अनिष्टं, मिश्रितं चेति नामत्रयेणापि प्रोक्तमस्ति । मनुष्यजीवनकाले यदा अनुकूला परिस्थितिः आयाति तदा सः इष्टफलम् आस्वादयेत्, सुखी च भवेत् । एवं प्रतिकूलपरिस्थितिः आयाति चेत् अनिष्टफलम् अनुभवेत्, सः दुःखी च भवेत् । मिश्रितफलं नाम अनुकूल-प्रतिकूलयोः परिस्थित्योः मध्यवर्तिफलम् । परन्तु अत्र विशेषता यत् यदि मनुष्यः फलेच्छापूर्वकं कर्म करोति, तर्हि तस्य फलं मरणानन्तरमपि भवति, परन्तु यदि फलेच्छां त्यक्त्वा कर्म तु अवश्यं कर्तव्यमेव इति भावनया करोति तर्हि तत्कर्मफलम् इह, परत्र च न कुत्रापि भवति, बाधते वा इति, शम् । (गी०-१८/०७-१२) (अनुवर्तिष्यते)

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# भूमिविवादे हरोलीक्षेत्रे गोलीकाण्डस्य प्रकरणम्



ऊना । हरोली-पुलिस-स्थानान्तर्गतं भदसाली-ग्रामे भूमि-विवादविषये गोलीकाण्डस्य घटनायां द्वौ जनाः मृतौ। भूमिविवादस्य विषये एकः पक्षः पितुः पुत्रयोः उपरि गोलीं प्रहारं कृतवान्, यस्य परिणामेण तयोः दुःखदः मृत्युः अभवत् । एसपी ऊना राकेशसिंहः प्रकरणस्य विषये अपराधस्थलं गतवान्। तत् सम्पूर्णं क्षेत्रं पुलिसैः सीलबद्धं कृतम् अस्ति। अत्र गोलीकाण्डः आसीत् । उभयत्र वाहनम् अपि मार्गे वर्तते, यस्मिन् आक्रमणकर्त्ता, पीडितः च द्वौ अपि गच्छतः आस्ताम्। एसपी राकेशसिंहः अवदत् यत् पुलिसैः प्रकरणस्य अन्वेषणं आरब्धम् अस्ति। मृतानां शवः मृत्योः पश्चात् तेषां परिवारेभ्यः समर्पितः।

# हास्यकणिका

## ।। भवान् एव मम जगत् अस्ति ।।

हास्यकणिका विशेषज्ञा –
विदुषी अग्रवाल
प्रेरणास्त्रोत्रः -
महाभागः श्री महेन्द्रमिश्र महोदयः



पतिः - प्रिये, अहं भवतीं बहु प्रेम करोमि।
पत्नी - अहं न करोमि किम् 😟 अहं तु भवतः कृते सर्वस्य जगतः युद्धं कर्तुं शक्नोमि, भवान् तु जानाति 😊
पतिः - परञ्च भवती तु मया सह दिवस-रात्रौ युद्धं करोति 😳
पत्नी (लज्जाभावेन) - भवान् एव मम जगत् अस्ति खलु 😀 😅

## होम्योपैथीवैद्यानां कृते मुख्यमन्त्रिणः बृहद्घोषणा, अधुना अध्ययनावकाशस्य समये वेतनस्य कर्तनं न भविष्यति

शिमला । मुख्यमन्त्री सुखविन्दरसिंहसुखुः उक्तवान् यत् राज्यसर्वकारेण स्नातकोत्तरपाठ्यक्रमेभ्यः अध्ययनावकाशकालस्य मध्ये होम्योपैथीवैद्येभ्यः शतप्रतिशतम् वेतनं दातुं निर्णयः कृतः। अध्ययनावकाशे तेषां कर्तव्यनिष्ठा इति विचारिता भविष्यति। पूर्वं अध्ययनावकाशकाले तेभ्यः वेतनस्य ४० प्रतिशतं भुक्तं भवति स्म । राज्यसर्वकारः राज्ये गुणवत्तापूर्णाः चिकित्सासेवाः प्रदातुं प्रतिबद्धतां स्वीकृत्य कार्यं कुर्वन् अस्ति।

## " मज्जनोन्मज्जनन्यायः "

तरणे अकुशलः जलप्रवाहे पतितः चेत् सः कदाचित् उन्मज्जति कदाचित् निमज्जति । तस्य स्वशरीरस्थितेः उपरि नियन्त्रणं न भवति तथा संसारसमुद्रे पतितः परमेश्वरकृपां यावत्पर्यन्तं न लभते तावत् संसारे उन्मज्जति निमज्जति च इति भावः ।
यथा-- अपारसंसारसमुद्रमध्ये निमज्जतो मे शरणं किमस्ति ।
गुरो कृपालो कृपया वदैतद् विश्वेशपादाम्बुजदीर्घनौका

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्